# .. shrIharisharaNAShTakam ..

# ॥ શ્રીહરિશરણાષ્ટકમ્ ॥

## Document Information

Text title : harisharaNAShTakam

File name : harisharaNAShTakam.itx

Category : aShTaka

Location : doc_vishhnu

Author : Swami Brahmananda

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA

Latest update : July 22, 2012

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીહરિશરણાષ્ટકમ્ ॥

શ્રીગણેશાય નમઃ ॥

ધ્યેયં વદન્તિ શિવમેવ હી કેચિદન્યે
શક્તિં ગણેશમપરે તુ દિવાકરં વૈ ।
રૂપૈસ્તુ તૈરપિ વિભાસિ યતસ્ત્વમેકસ્-
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૧॥

નો સોદરો ન જનકો જનની ન જાયા
નૈવાત્મજો ન ચ કુલં વિપુલં બલં વા ।
સંદૃષ્યતે ન કિલ કોઽપિ સહાયકો મે
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૨॥

નોપાસિતા મદમપાસ્ય મયા મહાન્તસ્-
તીર્થાનિ ચાસ્તિકધિયા નહિ સેવિતાનિ ।
દેવાર્ચનં ચ વિધિવન્ન કૃતં કદાપિ
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૩॥

દુર્વાસના મમ સદા પરિકર્ષયન્તિ
ચિત્તં શરીરમપિ રોગગણા દહન્તિ ।
સઞ્જીવનં ચ પરહસ્તગતં સદૈવ
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૪॥

પૂર્વં કૃતાનિ દુરિતાનિ મયા તુ યાનિ
સ્મૃત્વાખિલાનિ હૃદયં પરિકમ્પતે મે ।
ખ્યાતા ચ તે પતિતપાવનતા તુ યસ્માત્
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૫॥

દુઃખં જરાજનનજં વિવિધાશ્ચ રોગાઃ
કાકશ્વસૂકરજનિર્નિરયે ચ પાતઃ ।
ત્વદ્વિસ્મૃતેઃ ફલમિદં વિતતં હિ લોકે
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૬॥

નીચોઽપિ પાપવલિતોઽપિ વિનિન્દિતોઽપિ
બ્રૂયાત્તવાહમિતિ યસ્તુ કિલૈકવારમ્ ।
તં યચ્છસીશ નિજલોકમિતિ વ્રતં તે
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૭॥

વેદેષુ ધર્મવચનેષુ તથાગમેષુ

રામાયણેઽપિ ચ પુરાણકદમ્બકે વા ।
સર્વત્ર સર્વવિધિના ગદિતસ્ત્વમેવ
તસ્માત્ત્વમેવ શરણં મમ શઙ્ખપાણે ॥ ૮॥

॥ ઇતિ શ્રીપરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં
શ્રીહરિશરણાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA

.. shrIharisharaNAShTakam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*